Description.— Country paper ; Devanāgarī characters ; white in appearance ; hand-writing clear, legible and uniform ; daṇḍas and borders in red ink ; yellow pigment used for corrections ; complete.

Age.— Not very old.

Author.— Prabodhānanda Sarasvatī.

Begins.— fol. 1[b]

॥ श्रीराधामाधवो जयति ।
नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुतमहा-
महिम्ने विभ्राजत्कनकरुचिधाम्ने स्वकृपया
असंकोचेनैवाश्वपचमखिलेभ्यः स्वयमहो-
ददौ यः सद्भक्तिं विमलतरनानारसमयीं ॥ १ ॥

Ends.— fol. 25[b]

कदा पूर्णज्योत्स्ना धवलरजतौ रासव(?)ये
चरन्नेको वृंदावनपतिविलासस्मृतिपरः ।
अकस्मादानंदांबुधिलहरि कोलाहलमिव
ध्वनिं दिव्यं वेणोर्वलय रसनादेश्च श्रुणुयां ॥ १०९ ॥ इति
verses 50–52 are repeated on fol. 26[a]

References.— See No. 723.

वेतालपञ्चविंशतिका Vetālapañcaviṁśatikā

No. 725 170. / 1882–83.

Size.— $10\frac{1}{4}$ in. by $4\frac{4}{5}$ in.

Extent.— 34 leaves ; 14 lines to a page ; 45 letters to a line.

Description.— Country paper ; Devanāgarī characters ; edges of folios worn out ; hand-writing closely written but neat, legible and uniform ; borders ruled in triple black lines ; slightly moth-eaten ; पृष्ठमात्राs very rarely used.

The Ms contains 24 tales.

Age.— Appears to be fairly old.

Author.— Śivadāsa.

Subject.— A collection of twenty-five tales of a demon.

Begins.— fol. 1b.

ॐ नमो गणपतये ॥
प्रणम्य देवदेवेशं गणनाथं गणाधिपं ।
लोकानां तु विनोदाय करिष्येहमिमां कथां ॥ १ ॥
प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारब्धविघ्नविहिता विरमंति मध्याः ।
विघ्नैः सहस्रगुणतैरपि हन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजंति ॥ २ ॥

समस्तदेशावलोमौलिमणि श्रीमन्मावलकदेशे तत्र वीरधीरैकचूडामणिना निखिलदुर्जनदर्पापहारिणा श्रीनृपविक्रमादित्येन परिपालिता उज्जयनी नाम नगरी तत्र विक्रमसेनो नाम राजा विक्रमादित्य राजा अभूत् ॥ मंत्रवर्गपुरस्कृतः । etc.

fol. 6a इति वैतालपंचविंशतिकायां पद्मावतीकथानकं समाप्तं ॥ १ ॥ छ ॥

Ends.— fol. 34b

एवं भणित्वा यदा दिगंबरो नमस्कारं दर्शयति । तदा त्वया खड्गेन शिरच्छेदं विधाय कपाले रुधिरेण अशीर्वादो दातव्यः । एवं कृते सति अष्टौ महासिद्धयो भवंति । एवं कथयित्वा गतो वैतालः । इति श्रीवैताल॰ शिवदासविरचितायां चतुर्विंशतिमं कथाख्यानकं समाप्तं ॥

References.— (1) Mss.—A-Aufrecht's Catalogus Catalogorum :— i, 603b; iii, 126b.

B-Descriptive Catalogues :— I. O. Cat. Pt. VII, Nos. 4093-95; A. S. B. Cat. Vol. VII, Nos. 5409-12.

For details see the I. O. Catalogue numbers referred to above.

(2) Printed Editions :— Numerous editions of this work have been printed and the work is translated into many Indian vernaculars.

शम्भुराजचरित — Śambhurājacarita

No. 726 — $\frac{191.}{1875-76}$

Size.— 10 in. by $4\frac{2}{5}$ in.

Extent.— 90 leaves ; 8 lines to a page ; 30 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear and legible ; much of the portion scratched out by applying yellow pigment ; folios are not properly numbered hence difficult to find out the missing folios ; borders ruled in single and double black lines ; red pigment occasionally used ; some folios discoloured ; incomplete ; fol. 80 of the first part damaged.

The work was composed in Saṁvat 1741 i. e. in A. D. 1685. The Ms. contains only text and not commentary at stated by Buhler in his Report of 1875-76.

Age.— The Ms appears to be old.

Author.— Hari Kavi.

Subject.— The work, which appears to contain 12 cantos, describes the events in the life ot King Sambhāji, the successor of Shivaji.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥

हिमगिरितनया सा पातु मां सारवृत्त-
प्रथितगुणविसर्गायन्नुणाकृष्टचेताः ॥
त्रिभुवनगुरुरीशो यां वहन्नर्द्धदेहे
गमदतिविकृतं हाप्यर्द्धनारीश्वरत्वं ॥ १ ॥
श्लाघंते महिमानमत्र कवयः के केन दृष्टांतरा
श्चंचत्काव्यकराः परंतु गरिमा श्रीचक्रपाणेर्गुरुः
बिंबद्वेषिदले यदास्य कमले ... दंतातुले
वाग्देवी कमलेव विश्वहृदयप्रल्हादिनी खेलति ॥ ४ ॥
कांतेव मंजुलपदा कमनीयवर्णा
संश्लेषपूर्वकमपूर्वतरं वदंती ॥

न स्यात्कथं नु सरसा सकला सभावा
श्रीचक्रपाणिकविताभिमता बुधानां ॥ ५ ॥
अथ बहुलगुणः सुमाननीयो भुवनभुवा ...
... ... दकालिका विभ्रमकरीं
त्रिलोक्याः संतापं त्रिविधमिव हर्तुं दधदसा-
वपायान्नः पायात्त्रिपुरदवमेघस्त्रिनयनः ॥ ५ ॥
गिरां देवीसाक्षान्मम वदनमासाद्य सदया
विलासं सोल्लासं भुवनललितं कंदलयतां ।
यदीयाद्युन्मीलच्छरदमलचंद्रावलिनिभां
तनोः शोभां चेतोऽनिशमिहयतो मे कलयति । ६
नमः श्रीमन्नारायणगुरुपदांभोजरजसे
चिरायैताः कांता मम यदनुभावाद्भणितयः ।
लसद्वर्णाः कर्णामृतवितरणैकांतनिपुणः
प्रकाशंते कामं कविवरकृतानेकतनयः ॥ ७ ॥
बुधाः सोहं नारायणगुरुपदांभोरुहरते-
र्विजानीध्वं जातो जगति कमनीयः कवयिता ।
यदीयामापीयासृतरसझरीं श्रोत्रपुटकै-
र्गिरं गंभीरार्थं दिधति विबुधाः कामपि मुदं ॥ ८ ॥
सुधाधाराकाराः सरसतरमाकंठकुहरं
कवीनामापीय श्रवणचुलकैः सूक्तिलहरीः ।
अमांतं यच्छेषं नयनसलिलस्वेदपदतः
किरंतो दृश्यंते किल कतिपये ... क्ष ... ॥ ९ ॥
यशो देहो येषां कविवचनपीयूषनिवहैः
समासिक्तो जीवत्यगदजरमाकल्पममलः ।
त एव श्रीभाजो जगति बहुभाग्याश्च मनुजा-
स्तदन्ये जीवंतोप्यनिशमृतियुक्ता निगदिताः ॥ १२ ॥
न गीतैः कोप्यासीद्भुवनवलये ख्यातमहिमा
कवीनामाकल्पं रुचिरवचनैरेव भवति ।
अतो यत्नः कार्यो जगति सुयशः संचयकरै-
र्नरैः काव्यश्रेणीकरणचतुरप्रीणनविधौ ॥ १३ ॥
कवींद्रैर्यैः कस्याप्यमलगुणमुक्ताफलयुतै-
र्न काव्याख्यं सौधं स्ववचनसुवर्णैर्विरचितं ।

स्वकीर्त्तेः कांताया ललितमिह रंतुं प्रतिदिनं
न ते विज्ञैरुक्ताः किल सुकवयः किंतु कपयः ॥ १४ ॥
क्षमध्वं मे संतः क्षणमिह महासाहसमिदं
कवीनां प्रौढानां यदहममितां कीर्त्तिमखिलां ।
परिप्राप्तुं कुर्वे स्वमतिसदृशं काव्यमपि य-
न्नभोमार्गे यांति स्वमति सममेतो खगतयः ॥ १५ ॥
यदज्ञानाद्यद्वावारभसवशतो खलु मया
महाकाव्येऽवद्यं सकलमलनिर्णाशनिपुणाः ।
क्रियेत श्रीमंतस्तदखिलमलं शोध्यममला-
स्तमः शांतिं नैति स्वयमिह यतो भास्करमृते ॥ १६ ॥
सतां लोके लोलत्ययमनिशमौत्पत्तिकगुणः
परेषां यन्नित्यं नियतमुपकारव्यसनिता ।
यदोदेत्यन्येषां जगति परमोत्कर्षनिवह-
स्तदा तेषामृध्यत्यविरतमहोहर्षविभवः ॥ १७ ॥
खलानां हंसाहं कृति किमपि युष्मान्प्रति वदे-
यतो यूयं शक्ताः परगुणमहापर्वतमपि ।
अणुं कर्तुं दोषंत्वणुमपि सुमेरुं रचयितुं
यदीशेहंकारः सकलजनहासाय भवति ॥ १८ ॥
परद्रोहासक्तिः सततपरपैशून्यकथनं
परच्छिद्रालोकः परगुणकथामौनकरणं ।
परोत्कर्षामर्षो नियतपरनिंदा विरचनं
स्वभावो दुष्टानां यदयमनिशं कोपि जयति ॥ १९ ॥
पुरं नंदिद्वारं निखिलगुणसारं त्रिजगती
सुखानामाधारं भुवनवलये संविलसति ।
यदस्मिन्जायंते सकलसुखसंतुष्टमनसां
जनानामानंदा किल सुमनसां मोहनकराः ॥ २० ॥
यदत्रास्ते साक्षात्सकलजनता संजनयिता
स्वयं देवो गौरीपतिरपि जनार्त्ति शमयितुं ।
जटाजूटालोकाद्भवति जगताशं बहुविधं
तदाख्यातिं बिभ्रत्रिजगति जटाशंकर इति ॥ २१ युग्मं ॥

सिताभ्रश्वेताभाः शिवगिरिसमूहा इव बला-
दधः कर्तुं प्रायः सितकरमिवाभ्रं लिहशिखाः ।
यदीयाः प्रासादास्तनुललितवातायनयुता
लसंतःस्पर्द्धंते विबुधनगरी सौधनिवहैः ॥ २२ ॥
भ्रमं संबिभ्राणाः क्षणरुचिचलत्कांचनलता
शरज्ज्योत्स्नांबांया(?) कमलदलदीर्घाक्षियुगलाः ।
पदांभोजभ्राजद्रणितमणिमंजीररुचिरा
विराजंते यस्मिन्पथि पथि सदा चंद्रवदनाः ॥ २३ ॥
इहासीन्नासीरं रुचिरतनुभाजां त्रिभुवने
शिवाख्यो देशानामधिपतिरनेकाद्भुतगुणः ।
यमालोक्योत्फुल्लद्विपुलनयनोद्गीर्णनिमिषाः
समुत्कीर्णा भित्ताविव समभवन्सर्ववनिताः ॥ २४ ॥
सुधासिंधुं प्राप्य श्रवणविवराद्यद्गुणमयी
मिमामस्मद्वक्त्रं किरति रमणीं वाक्यसरणीं ।
सुधीरो गंभीरो विपुलधिषणोत्यंतरमणो
वदान्यो नेहान्यो जगति शिवभूपाद्विजयते ॥ २५ ॥
वदंत्येके कीर्त्तिं किल कुमुदिनीं यस्य विमला
महोमल्लीं वल्लीमपि कतिपयेन्येसुरधुनीं ।
वयं ब्रूमो यस्मादखिलमुकलानामधिपते
रिमां जातां ज्योत्स्नां सुजनकुमुदानंदजननीं ॥ २६ ॥
प्रतापो यस्यैजन्सुजनपरितापोपशमनोऽ
त्रिमालीनां हीनामपि च विदधानो जनि भुवं ।
प्रकाशोल्लोकेऽस्मिन्विहित इति मत्वेवरविणा-
ह्यलोकेप्यालोकं स्वयमिह वितन्वन्विजयते ॥ २७ ॥
ततः कांतः प्रातस्तनवनजविस्फारिनयनः
समुन्मीलद्राकाहिमकरतिरस्कारिवदनः ।
त्रिलोकी लोकानां नियुतनयनापेयसुषुम-
श्चलत्कांत्युल्लोलः प्रथमरसपाथोनिधिरिव ॥ २८ ॥
प्रदीपो दीपांगादिव गगनरत्नादिव महा-
महः पुंजः पद्मादिव परमसौरभ्यनिवहः ।
सुधांशुः क्षीराब्धेरिव हरितरुर्नंदनवना
दिवायं संभूतः किल शिवनृपाच्छंभुनृपतिः ॥ २९ । युग्मं

यद्दस्यास्ते साक्षाद्गुरुरिव महोदाराधिषणो
गुरुः कृष्णो गौरीपतिरिव गभीराद्भुतगुणः ।
यमाराध्य प्राप्तैरमितगुणसंघैर्वितनुते
लसत्पीयूषौघैरिव हि जगतां रंजनमयं ॥ ३१ ॥
गुणानामाधारस्त्रिभुवनभवानां शिवभवो
यदेकोयं शंभुर्विलसति महीपालतिलकः ।
कवींद्राः प्रोन्निद्रा बहुतरमिमींमंसुमतयो
वचोभिः श्लाघंते त्रिभुवनचमत्कारचतुरैः । ३१ etc.

Begins.— fol. 53^b इति श्रीमत्सूर्यपुरस्थितश्रीनारायणसूरिसूनुहरिकविविरचिते विजयांके श्रीशंभुराजचरिताख्ये महाकाव्ये श्रीशंभुराजविवाहवर्णनो नाम चतुर्थ सर्गः समाप्तः ॥ श्री ॥ छ ॥

1st part Ends.—fol. 82^b

सूते नानापदार्थास्तव यदसिलता शंभुराजाद्भुतं त-
त्तापार्कं कीर्तिचंद्रं विजयहुतभुजं तारकालीं गुणालीं ।
झा(?)त्काराञ्चिशुदोघानपि रिपुकमलां भारतीमस्मदीयां
नारीणां शात्रवीणां नयनयुगसरा बाष्पशैवालिनीश्च ॥ १२८ ॥
प्रोद्धृत्य प्रासरासन्नहतभटघ-

2nd part Begins.— fol. 1^a

श्रीगणेशाय नमः

हिमगिरितनया etc. up to अर्द्धनारीश्वरत्वं ॥ १ ॥
as in the beg. of first part.

followed by श्रीमानाजेंद्रवदनः सदनं मतीनां
पायादपायभयतः स नु मां नितांतं ॥
भक्तानुरागमिव कुंभयुगे दधानः
सिंदूरपूरममितं बहिरुज्जिहानं ॥ २ ॥
यो मां दधाति कमनीयतनुं रसालः
फुल्लां वसंततिलकां लतिकामिवायं ॥
जीमूतराज इव विद्युतमुल्लसंतीं
श्रीमान्स पातु भगवानरविंदनाभः ॥ ३ ॥ etc.

Ends.— fol. 235^a (22^a)

श्रीचिंतामणिसूरिसूनुविबुधश्रीरंगनाथोद्भव-
श्रीनारायणसंभवो हरिकविर्यः श्रीशपादाश्रयः ॥

सर्गोऽभूदनवद्यपद्यरचनाचातुर्यविद्योतिते-

तत्काव्ये खलु शंभुराजचरिते काव्यातिमो द्वादशः ॥ १७६ ॥

पीयूशांशु १ समुद्र ४ सप्त ७ वसुधा १ विद्योतिते वैक्रमे

वर्षे मासि च पौषनाम्नि बहुले पक्षे द्वितीया दिने

सद्वारे द्विजनायकस्य पितृभे चापूर्णयच्छ्रीहरिः

काव्यं शोभनशंभुराजचरितं नानागुणोज्जृंभितं ॥ १७७ ॥

इति श्रीसूर्यपुरस्थितश्रीनारायणसूरिसूनुहरिकविविरचिते विजयांके शंभुराजचरिताख्ये महाकाव्ये राजनीतितत्त्वोपदेशनिर्णयो नाम द्वादशः सर्गः संपूर्णः ॥ ॥ श्रीः ॥ संपूर्णं चैतत्काव्यं ॥ श्रीः ॥ श्रीः

सुधानामाधारः स खलु भगवानोषधिपतिः

स्वकीयैः पीयूषैः सुधयतु मदीयां कृतमहो ॥

यदेतामापीय त्रिभुवनभुवोलोकनिवहाः

सुधाधारां वाञ्चि प्रदधति निजायां शिखरिणीं ॥ १ ॥

Then follows some portion over leaf but the contents are not legible.

References.— Aufrecht mentions the present Ms only in his Cata. Catalo. i, 637[a].

See also P. K. Gode's Article "Harikavi and his Works" in the Annals of the B. O. R. Institute Vol. XVI pp. 262-291.

शिवभद्रकविकाव्य — Śivabhadrakavikāvya

No. 727 — 176 (v). / A 1882-83.

Size.—
Extent.—
Description.— } See No. 176 (iii) / A 1882-83

Age.— Not mentioned.

Begins.— folio. 3[a]

प्रणमतसदसिगदंतं । वैद्यमहन् योगप्रियाणि सदासिगदंतं ।

चूर्णितचक्रतुरंगं रुक्मिणमस्तं च यस्य चक्रतुरंगं ॥ १ ॥

Ends.— folio. 3[b]

सिद्धिं भवदाशानां वैमाल्य कथयतीव भवदाशानां ।
स्फुटविकसत्कमलाभं जलं च भूयोभिमन्यसे कमलाभं ॥ १९ ॥

इति शिवभद्रकविकाव्यं ॥

Aufrecht does not refer to this work in his Catalogus Catalogorum.

शिवभद्रकाव्य Śivabhadrakāvya

No. 728 176 (vi). / A 1882-83.

Size.—
Extent.—
Description.— } See No. 176 (iii) / A 1882-83

Author.— Śivabhadra.

Begins.—folio. 3[b]

अथ शुभचापगुणेषु स्थिरधीवीर्ये परस्य चापगुणेषु ।
विभ्रदगच्छद्यानं स्तनं विहायावनेरगस्च्छद्यानं । १ ॥ etc.

Ends— folio. 4[b]

रागाद्पदेशंकः कुर्यागुद्वस्य नयाविद्पदेशंकः ।
सर्वत्र नयो जयति । प्रधनं ते न बलवानपि न योजयति ॥ २८ ॥

इति शिवभद्रकाव्यं समाप्त ॥

शिवाविवाहमंडप Śivāvivāhamaṇḍapa

No. 729 388. / 1892-95.

Size.— 10 in. by 4 in.

Extent.— 26 leaves; 11 lines to a page; 40-42 letters to a line.

Description.— Country paper ; Devanāgarī characters , old in appearance ; hand-writing clear, legible and uniform ; occasional पृष्ठमात्राs used ; red pigment used for marking verse-numbers and chapter-colophons ; fol. 1 missing.

Age.— Śamvat 1670.

Author.— Somanātha.

Begins abruptly.— fol. 2ª

अथ चंपूमंडपिकां रचयामि शिवा विवाहस्य ॥ ७ ॥
दृश्यप्रदोषापि कृतिर्ममैषा राका निशाचंद्रमसेव पूर्णा ॥
भूष्धामयैवेति धियाधिगम्या सता जनेनोल्लसताकलाभिः ॥ ८ ॥ etc.

Ends.— (text) fol. 26ª

तदा सहासनिखिलस्वभ्यवदने । शिवाविवाहमंडपतले समुत्फुल्लकुमुद्प्रकरे सरोवरे प्रतिबिंबितौ स्फुरच्चंद्रिका सुधाकराविव व्यरालंतांस्मरयमानाननावुमाशंकरौ ॥ ६ ॥

मंगलार्थमाश्रिते गुणावलव्यलंकृतौ सोमनाथकल्पिते शिवाविवाहमंडपे ॥ साधुरूपधातुजातवर्णजातचित्रितस्तंभएषनातिदैर्घ्यभागातस्करीयतां ॥ ६ ॥ ४ ॥

सकलकलकुलाग्ग्यमुऽद्गलायौऽजनिजठरे किल मां पायां बयात्तः ॥
व्यतनुतगतिकोमलः ससोमः कविरिति सोमशिवार्प्यणाय चंपूं ॥
शके खाग्निवाणेंदु १५३० कीलकेब्दे मधौ मासि पक्षे परे रक्ष...क्षे ॥
विशाखस्य तिथ्यामथार्कस्य वारे शिवायार्पि सोमेन संपूर्य चंपूः ॥

॥ संवत् १६७० संवत्सरपवर्त्तमाने भाद्रपद वदि चतुर्थी सोमवासरेदं पुस्तकं दंजवलग्राममध्ये सकलकलावासां जीमठे ॥ मोढज्ञातीय अमदाबादनिवासिगोवर्द्धनेन लिखितं । श्रीरस्तु कल्याणमस्तु ॥ शुभं भवतु ॥ यादृशं... न दीयते ॥ श्रीराम ॥ श्रीकृष्णः ॥ श्रीगोपाल ॥ श्रीनृसिंहः ॥ श्रीविश्वेश्वरः ॥ ६ ॥

This is the only Ms recorded by Aufrecht in his Catalogus Catalogorum iii, 136.

शिशुपालवध
or
माघकाव्य

Śiśupālavadha
or
Māghakāvya

No. 730

190.
A 1882-83.

Size.— 10 in. by $4\frac{2}{5}$ in.

Extent.— 64 leaves ; 13 lines to a page ; 45 letters to a line.

Description.— Country paper ; old but well-preserved ; Devanāgarı characters with occasional पृष्ठमात्राs ; hand-writing, clear legible and uniform ; borders ruled in double lines and edges in single , red pigment used for verse-numbers and colophons.

The Ms. is complete in 20 sargas.

Age.— Saṁvat 1776.

Author.— Māgha.

Begins.— fol. 1[a]

॥ ६० ॥ ॐ नम श्रीसारदायै ॥

श्रियः पतिः श्रीमतिशासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरंतमबराद्धिरण्यगर्भांगभुवं मुनिं हरिः १
द्विधा कृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः
गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्द्धज्वलनं हविर्भुजः
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः ॥ २
चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभावितार्कृतिं
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि स ३ etc. ..

folio 4[b] इति शिशुपालवधे महाकाव्ये दत्तकस्य सूनोर्माघस्यकृतौ श्र्यंके नारदाभिगमनो नाम प्रथमः सर्गः ॥ १ ॥

folio 7[b] इति etc. ... ... संभाषणो नाम द्वितीयः सर्गः ॥२

folio 61[a] इति etc. ... ... सेनायुद्धं नाम एकोनविंशतितमः सर्गः ॥ ० ॥ १९ ॥

Ends.—folio 64[a]

शुद्धिं गतैरपि परामृजुभिर्विदित्वा
बाणैरजह्यमविघट्टितमर्म्मभिस्तं ।

मर्मातिगैरनृजुभिर्नितरामशुद्धै-
वाक्सायकैरतितुतोद तदा विपक्षः ॥ ७७ ॥

राहुस्त्रीस्तनयोरकारि सहसा येनाश्लथालिङ्गन-
व्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्वृथा
तेनाक्रोशत एव तस्य मरुजित्तत्काललोलानल-
ज्वालापल्लवितेन मूर्द्धविकलं चक्रेण चक्रे वपुः ७८
श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षै-
र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय
प्रकाशेनाकाशे दिनकरकरान्विक्षिपन् विस्मिताक्षै-
र्नरेंद्रैरोपेन्द्रं वपुरथ विशद्धाम वीक्षांबभूवे ॥ ७९ ॥

इति शिशुपालवधे महाकाव्ये दत्तकसूनोर्माघस्य कृतौ श्र्यंके दिव्यास्त्र-प्रयोगानंतरं शिशुपालवधो नाम विंशतितमः सर्गः ॥२० ॥ श्री० ॥ ग्रंथाग्रं ३००० ॥ श्री ॥ श्री ॥ अधुना कविः श्रीमाघः निजवंशवर्णनं कर्तुमाह

सर्वाधिकारी सुकृताधिकारः श्रीवर्म्मलाख्यस्य बभूव राज्ञः
असक्तदृष्टिर्विरजाः सुदेवो देवोपरः सुप्रभदेवनामा १
कालेमितं तथ्यमुदर्कपथ्यं तथागतस्यैव जनः सचेताः
विनानुरोधं स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार । २
तस्याभवद्दत्तक इत्युदात्तः क्षमीमृदुर्द्धर्मपरस्तनूजः ।
यं वीक्ष्य वैया समजातशत्रोर्वचोगुणग्राहिजनैः प्रतीये ॥ ३
सर्वेण सर्वाश्च इत्यनिंयमानादभाजा जनितं जनेन ।
यश्च द्वितीयं स्वयमद्वितीयो मुख्यः सतां गौणमवाप नाम ॥ ४

श्रीसर्गरम्यकृतसर्गसमाप्तिलक्ष्म-
लक्ष्मीपतेश्चरितकीर्त्तनमात्र चारु ।
तस्यात्मजः सुकविकीर्त्तिदुरासयोदः
काव्यं व्यधत्त शिशुपालवधाभिधानं ॥ ५

श्रीरस्तुः लेखकपाठकवाचकश्रोतृभ्यः ॥ संवत् १७७६ वर्षे मिति प्रथम आसोज वदि ८ गुरुवासरे लिखितं पण्डितसभालंकार पं. श्री १०८ भक्तिधर्म्मजीशिष्य पं. केसरकीर्त्तिगणिना ॥ पुरमध्ये ॥ शुभं भवतु ॥ कल्याणमस्तुः ॥ श्रीः ॥ श्रीः ॥

References.— 1 Aufrecht's Catalogus Catalogorum Part I, p. 656[a] Part II, pp. 156[b], 230[a] Part III, p. 136[b].

2 Winternitz—History of Indian Literature Vol. III pp. 67-70.

3 A. B. Keith— History of Sanskrit Literature pp. 124-31.

4 Descriptive Catalogue of Mss., Madras Vol. XX Nos. 11719-69.

शिशुपालवध Siśupālavadha

No. 731 322. / A. 1881-82.

Size.— 10 in. by $3\frac{4}{5}$ in.

Extent.— 8 leaves; 8 lines to a page; 32 letters to a line.

Description.— Country paper; modern Devanāgarī characters; hand-writing bold, legible and uniform; borders ruled in double red lines, red pigment used for verse-numbers.

The Ms. contains only the 1st canto.

Author.— A modern copy.

Author.— Māgha.

Begins.— folio 1[a]

श्रीगणेशाय नमः ॥

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

Ends.— folio 8[b]

ओमित्युक्तवतोथशार्ङ्गिण इति व्याहृत्य वाचं नभ-
स्तस्मिन्नुत्पतिते पुरः सुरमुना विंदोः श्रियं बिभ्रति ॥
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैवं प्रति-
व्योम्नोव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदं ॥ ७५ ॥

इति श्रीमाघकृतौ महाकाव्ये शिशुपालवधे प्रथमः सर्गः ॥ छ ॥

यादृशं पुस्तकं etc. ......इदं पुस्तकं सदाशिवात्मजेन रामकृष्णेन लिखितं ॥ छ ॥ श्रीशंकरप्रसन्न ॥

References.— See No. 730.

शिशुपालवध — Śiśupālavadha

No. 732 — 498. / 1899-1915.

Size.— $10\frac{2}{5}$ in. by $4\frac{4}{5}$ in.

Extent.— 20 leaves ; 13-14 lines to a page ; 35 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear and legible ; edges slightly damaged.

The Ms. breaks off at the 5th verse of the 6th canto.

Age.— Appears to be old.

Author.— Māgha.

Begins.— folio 1ᵇ

॥ श्रीगणेशाय नमः ॥ श्रीसांबाशिवाय नम ॥

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

folio 4ᵇ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके कविश्रीमाघकृतौ नारदाभिगमनो नाम प्रथमः सर्गः ॥ श्री ॥

folio 20ᵇ इति etc. .. ...सैन्यवर्णनो नाम पंचमः सर्गः ॥ ५ ॥

Ends.— folio 20ᵇ

स्फुटमिवोज्वलकांचनकांतिभिर्युतमशोकमशोभत चंपकैः ॥

विरहिणां हृदयस्यभिदाभृतः कपि.........

References.— See No. 730.

शिशुपालवध — Śiśupālavadha

No. 733 — 323. / A. 1881-82.

Size.— $9\frac{3}{5}$ in. by $4\frac{1}{4}$ in.

Extent.— 21 leaves ; 9 lines to a page ; 35 letters to a line.

Description.— Country paper; modern Devanāgarī characters; hand-writing clear and legible; borders ruled in black lines; folios 19-20 missing.

The Ms. contains Sargas 2-5.

Age.— Not very old.

Author.— Māgha.

Begins.— folio 1[b]

॥ ॐ नम ॥ श्रीगणेशाय नम॰ ॥

यियक्षमाणेहूत॰ पार्थेनाथद्विषन्मुरं

अभित्वैवं प्रतिष्टासुरासीत्कार्य द्वयाकुलः ॥ १ ॥

गुरुकाव्यानुगां विभ्रच्चाद्रीमभिनभः श्रियं ॥

सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः ॥ २ ॥ etc.

folio 7[a] इति श्रीशिशुपालवधे माघकाव्ये श्र्यंके आलोचनं नाम द्वितीय॰ सर्ग्गः ॥ २ ॥ ॥ छ ॥

Ends.— folio 23[a]

धरस्योद्धर्त्तासि त्वमिति ननु सर्वत्र जगति-

प्रतितस्तत्किं मामतिभरमधः प्रापिपयिषुः ॥

उपालब्धे वोच्चैर्गिरिपतिरिति श्रीपतिमसौ-

बलाक्रांत॰ क्रीडद्विरदमथितोर्वीरुहरवैः ॥ ६९ ॥

इति श्रीशिशुपालवधे महाकाव्ये माघकृतौ श्र्यंके सेनावर्णनं नाम पंचमः सर्गः ॥ ५ ॥ ॥ छ ॥

References.— See No. 730.

शिशुपालवध **Śiśupālavadha**

No. 734 **488. / 1895-1902.**

Size.— $9\frac{1}{5}$ in. by $3\frac{3}{5}$ in.

Extent.— 62 leaves; 6-7 lines to a page; 30 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing not quite clear and legible; occasional marginal notes; borders ruled in black lines.

The Ms. contains Sargas 1-7.

Age. — Appears to be old.

Author.— Māgha.

Begins.— folio 1[b]

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ कुलदेवतायै नमः शिवमस्तुः ॥
श्रियः पतिः श्रीमतिशासितुं etc. ...... as in No. 730.

folio 10[b] इति शिशुपालवधे महाकाव्ये नारदागमनो नाम प्रथमः सर्गः समाप्तः ॥ १

folio 20[b] इति etc. ... .मंत्रविचारो नाम द्वितीयः सर्गः ॥ २

Ends.— folio 62[b]

प्रियकरपरिमार्गादंगनानां यदाभूत्पुनरधिकतरैव खेदतोयोदयश्री· ॥
अथ वपुरभिषेक्तुं तस्तदांभोधिरीशुर्वनविहरणखेदम्लानमम्लानशोभाः ॥ ७५ ॥
इति श्रीशिशुपालवधे महाकाव्ये सप्तमः सर्गसमाप्तिं प्रापत् ॥ छ ॥

References.— See No. 730.

शिशुपालवध Śiśupālavadha

No. 735 — 51. / 1873-74.

Size.— 10⅗ in. by 4⅗ in.

Extent.— 39 leaves ; 17 lines to a page ; 60 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters with पृष्ठमात्रा s ; hand-writing small but clear, legible and uniform ; red pigment used for verse-numbers ; borders ruled in two double black lines ; square blank spaces in the centre.

The Ms. is complete in 20 sargas.

Age.— Appears to be old.

Author.— Māgha.

Begins.— folio 1[a]

॥ ६० ॥ ॐ नमो भगवते श्रीशांतिनाथाय ॥
श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

folio 2[b] इति शिशुपालवधे महाकाव्ये श्र्यंके माघकृतौ नारदागमनो नाम प्रथमः सर्गः ॥ १ ॥

folio 4[b] इति etc. .. ... मंत्रवर्णनो नाम द्वितीयः सर्गः

folio 37[b] इति etc. ... दुष्करयुद्धो नामैकोनविंशतितमः सर्ग· ॥१९॥

Ends.—folio 39[b]

शुद्धिं गतैरपि etc. up to वीक्षां बभूव ॥ ७९ as in No. 730.

followed by इति शिशुपालवधे महाकाव्ये श्रीलक्ष्मणिदत्तकसूनोर्माघस्य कृतौ दिव्यास्त्रप्रयोगानंतरं शिशुपालवधो नाम विंशति(त)मः सर्गः ॥ २॥ अथ कविवंशवर्णनं ॥

सर्वाधिकारी सुकृताधिकारः etc. ... ... up to

... ... काव्यं व्यधत्त शिशुपालवधाभिधानं ॥ ५ ॥ as in No. 730.

References.— See No. 730.

शिशुपालवध Śiśupālavadha

No. 736 171. / 188?–83.

Size.— $9\frac{3}{8}$ in. by $4\frac{1}{4}$ in.

Extent.— 84 leaves ; 13 lines to a page ; 30 letters to a line.

Description.—Country paper ; old in appearance ; Devanāgarī characters with पृष्ठमात्राs ; hand-writing, clear, legible and uniform ; borders and edges ruled in black lines ; square blank spaces in the centre ; some folios slightly torn ; portion in some places scratched out.

Age.— Saṁvat 1733.

Author.— Māgha.

Begins.— folio 1[b]

॥ ६० ॥ श्रीगणेशाय नमः

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

folio 5ª इति श्रीदत्तकसूनोर्माघस्य कृतौ शिशुपालवधे महाकाव्ये विष्णु-
नारद ... नाम प्रथमः सर्गः ॥

folio 9ª इति माघे द्वितीय सर्ग्गः ॥

folio 80ª इति श्रीशिशुपालवधे महाकाव्ये द्वंद्वयुद्धातानामेकोनविंशति
तमः सर्ग्गः

Ends.— folio 84ª

शुद्धिं गतैरपि etc. up to काव्यं व्यधत्त शिशुपालवधाभिधानं ॥८४॥
as in No. 730.

followed by इति श्रीशिशुपालवधे महाकाव्ये दत्तकसूनोः माघकृतौ
श्र्यंके विंशति(त)मः सर्ग्गः समाप्तः ॥ ॥ समाप्तं चेदं माघकाव्यं ॥ संवत्
१७३२ वर्षे पौषशुदि ९ भौमदिने लषीतं पत्तनेपुरे ॥ ॥

References.— See No. 730.

शिशुपालवध — Śiśupālavadha

No. 737 — 802. / 1886-92.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 138 leaves; 8-9 lines to a page; 30 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing, clear and legible but not uniform; borders ruled in triple black lines and edges in single; red pigment used; fol. No. 35 repeated.

The Ms. is complete in 20 sargas.

Age.— Saṁvat 1738.

Author.— Māgha.

Begins.—folio 1ᵇ

॥ श्रीगणेशाय नमः ॥
श्रीयः पति श्रीमतिशासितुं etc. as in No. 730.

folios 8ᵇ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके माघकृतौ नारदाभिगमनो नाम
सर्गः समाप्ता संपूर्णाः ॥ ६० ॥

folio 16ª इति etc. . . . मंत्रकरणो नाम द्वितीय सर्गः ॥ २ ॥

.. ..

folio 129ª इति etc. ... ... दुष्करैकोनविंशतिः सर्गः ॥ १९ ॥

Ends.— folio. 137ª

शुद्धिंगतैरपि etc. ... .. upto वीक्षांबभूवे ॥

as in No. 730

followed by इति शिशुपालवधे महाकाव्ये हरौ शिशुपालतेज: प्रवेशो नाम विंशति(त)मः सर्गः ॥ २० ॥ स(मा) प्तमिदं महाकाव्यं ॥

सर्वाधिकारी सुकृताधिकारः etc. .. upto काव्यं व्यधत्त शिशुपालवधाभिधानं ॥ ५ ॥ as in No. 730.

followed by कृतिरियं श्रेष्टिकदत्तसूनोर्महाकाव्ये माघस्य शुभं भवतु ॥

वसुरामसुनींद्वब्दे मासे भाद्रपदे सिते ॥

गुरुधस्रेव्य लेखीदं शिशुपालवधाव्हयम् ॥ १ ॥

पूर्वार्द्धे पु(?)ते चंद्रो वा उत्तरार्द्धे कुतूहलः ॥

खखबाणेंदुसंख्यं च नानापद्यलसत्पदम् ॥ २ ॥ युग्ममेतत् ॥

पुस्तकलिखनपारिश्रमवेत्ता विद्वज्जनो नान्य. ॥

सागरलंघनखेदं हनुमानेकः परं वेत्ता ॥ १ ॥

लेखकपाठकयोः शुभं भूयात् ॥ करकृतमपराधं क्षंतुमर्हंतु सत ॥

References.—See No. 730.

शिशुपालवध Śiśupālavadha

No. 738 321. / A 1881-82.

Size. – $9\frac{3}{5}$ in. by $4\frac{1}{4}$ in.

Extent.—106 leaves ; 8 lines to a page ; 30 letters to a line.

Description.— Country paper ; modern Devanāgarī characters ; hand-writing clear and legible but not uniform , folios 1-10 and 72 missing.

The Ms. contains sargas 7-20.

Age.— Not very old.

Author. – Māgha.

Begins.—folio. 11[b]

... ... निरस्तव निश्चयः परेण।
वितथयति न जातु मद्वचोसाविति च तथापि सखीषु मेभिमानः ॥ ८ ॥
सततमनभिभाषणं मया ते परिपणितं भवतीमनानयंत्या ॥
त्वयि तदिति विरोधनिश्चितायां भवति भवत्व सुहृज्जनः मकाम ॥ ९ ॥
etc.

folio 18[b] इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके वनविहारो नाम सप्तम सर्गः ॥

... ...

folio 110[b] इति etc. ... ... एकोनविंशतितमः (स)र्गः ॥

Ends.—folio. 117[a]

foll. 116[a] शुद्धि गतैरपि etc. upro वीक्षां बभूवे ॥ ७९ ॥
as in No. 730.

followed by इति माघः समाप्तः ॥
सर्वाधिकारी सुकृताधिकारः etc. upto काव्यं व्यधत्त
शिशुपालवधाभिधानं ॥ ८४ ॥ as in No. 730.

followed by इति श्रीशिशुपालवधे महाकाव्ये माघकृतौ श्र्यंके विंशतिः सर्ग ॥ २० ॥ श्री

References.—See No. 730.

शिशुपालवध Śiśupālavadha

No. 739 31. / 1870-71.

Size.—$11\frac{1}{2}$ in by 6 in

Extent. – 74 leaves; 13–14 lines to a page; 36 letters to a line.

Description.— Country paper; very old and discoloured; Devanāgarī characters with पृष्ठमात्राs; hand-writing not quite clear and legible; borders ruled in double black lines;

portions marked with red pigment; folios pasted with paper slips; folio 32 missing and fol. Nos. 21 and 31 repeated.

The Ms. is complete in 20 sargas.

Age.—Saṁvat 1545.

Author.—Māgha.

Begins.—fol. 1b

॥ ॥ ॐ नमः श्रीगणेशाय ॥

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

folio 6a इति श्रीशिशुपालवधे महाकाव्ये श्यके नारदाभिगमनो नाम प्रथम सर्ग. ।

folio 10b इति etc.........मंत्रोत्पत्तिर्नाम द्वितीयः सर्गः समाप्तः ॥

folio 68b इति etc.. ......एकोनविंशति(त)मः सर्गः । समाप्तः

Ends.— folio 73a

शुद्धिं गतैरपि etc...upto वीक्षां बभूवे ७९ as in No. 730.

followed by इति श्रीशिशुपालवधे महाकाव्ये श्यके शिशुपालवधो नाम विंशति(त)मः सर्गः । समाप्तः ॥ शुभं भवतु ॥ छ ॥

संवत् १५४५ वर्षे श्रावणमासे ८ तिथौ...वासरे स्वपठनार्थे राधकेन इदं माघकाव्यस्य पुस्तकं स्वयमेव लिषितं । परार्थे च ॥ शुभमस्तु लेखकपाठकयो. ॥ छ ॥ श्री कल्याणं भवतु ॥

References.— See No. 730

शिशुपालवध Śiśupālavadha

No. 740 389. / 1892-95.

Size.— $10\frac{1}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 39 leaves; 17 lines to a page; 50 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters with occasional पृष्ठमात्राs; hand-writing, clear and legible but not uniform; borders ruled in two double

black lines, red pigment used, square blank spaces in the centre of the folios

The Ms. contains an अवचूर्णि upto the 8th sarga.

Age.— Saṁvat 1488.

Author.—Māgha.

Begins.— folio. 1[a]

Text ॥ ए० ॥ श्रियः पतिः श्रीमति शासितुं etc. as in No. 730.

Com. ॥ ए० ॥ नमः सर्वज्ञाय ॥ अभिलषितसिद्ध्यर्थं मंगलादिकाव्यं कर्त्तव्यं इति स्मरणात्कविः श्रीशब्दमादौ प्रायुंक्त। श्रिय इत्यादि ॥ हरिर्मुनिं ददर्शेति वाक्यार्थः। etc. ... ...

folio 3[a] इति शिशुपालवधे श्र्यंके श्रंगदत्तकसूनोर्माघस्य कृतौ नारद-संभाषणो नाम प्रथमः सर्गः ॥ छ ॥

Col. of com. folio 3[a] इति प्रथमसर्गचूर्णिः ॥ छ ॥

folio 5[a] इति etc. ... ... मंत्रवर्णनो नाम द्वितीय सर्गः ॥छ॥

folio 37[b] कविकाव्यानामगर्भं चक्रं इति शिशुपालवधे महाकाव्ये दुःकर-युद्धं नामैकोनविंशति(त)मः सर्गः ॥

Ends.—folio 39[b]

शुद्धि गतैरपि etc. ... ... upto काव्यं व्यधत्त शिशुपालवधाभिधानं ॥ ८४ as in No. 730

followed by इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके दत्तकसूनोर्माघस्य कृतौ शिशुपालवधाभिधानो नाम विंशतिमः सर्गः समाप्तः ॥ ग्रंथाग्रं १२२ संवत् १४८८ वर्षे माघसुदि पूर्णिमायां लिलिखान ॥

References.— See No. 730

शिशुपालवध
with टीका
सर्वङ्कषा

Sisupālavadha
with comm.
Sarvaṅkaṣā

No. 741

158.
1866-68.

Size.—13 in by $3\frac{3}{4}$ in.

Extent.— 115 leaves ; 8–9 lines to a page , 40 letters to a line.

Description.— Modern paper with water-marks , bluish in colour ; Devanāgarī characters , hand writing, clear and legible , separate pagination for each canto , yellow pigment used for corrections.

The Ms. is a bound copy and contains sargas 1-3.

Age.—Śaka 1789.

Author of the text.—Māgha.

" " com.—Mallinātha.

Begins.—folio 1[b]

Text श्रीयः पतिः श्रीमतिशासितुं etc. as in No. 730

श्रीगणेशाय नमः

Com. इंदीवरदलश्याममिंदिरानंदकंदलं
वंदारुजनमंदारं वंदेहं यदुनंदनं १
दंताचलेन धरणीतलमुन्नमय्य पातालकेलिषु धृतादिवराहलीलं
उल्लंघनोत्फणत्फणाधरगीयमानक्रीडावदानमिभराजमुखं नमामि २
शारदां शारदांभोजवदना वदनांबुजे
सर्वदा सर्वदास्माकं संनिधिं संनिधिं क्रियात् ३
मल्लिनाथसुधीः सोयं महोपाध्यायशब्दभाक्
विधत्ते माघकाव्यस्य व्याख्यां सर्वंकषाभिधां ४
ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालंक्रिया-
शिक्षाकौतुकिनो विहर्तुमनसो ये च ध्वनेरध्वगाः
क्षुभ्यद्भावतरंगिते रससुधापूरे मिमंक्षंति ये
तेषामेव कृते करोमि विवृतिं माघस्य सर्वंकषां ५

नेतास्मिन्यदुनंदनः स भगवान् वीरः प्रधानं रसः
शृंगारादिभिरंगवान्विजयते पूर्णा पुनर्वर्णना
इंद्रप्रस्थगमाद्युपायविषयैश्चैद्यावसादः फलं
धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात् ६
इहान्वयमुखेनैव सर्वं व्याख्यायते मया
नामूलं लिख्यते किंचिनानपेक्षतमुच्यते ७

अथ तत्र भगवान माघकविः काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिवृतये कांतासंमिततयोपदेशयुजं इत्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां काव्य(I)लापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयतां च पश्यन् शिशुपालवधाख्यं काव्यं चिकीर्षुश्चिकीर्षितार्थो विघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबंधमुखलक्षणत्वाच्च काव्यफलं शिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्त्वादौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपशिक्षति श्रिय इति तत्रादौ श्रीशब्दप्रयोगाद्वर्णगणादिदोषशुद्धिरभ्युच्चयः तदुक्तं.

देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः
ते सर्वेनैव निंद्याः स्युर्लिपितो गणतोऽपिवेति

श्रियः लक्ष्म्याः पतिः एतेन रुक्मिणीरूपया श्रिया समेत इति सूचितं राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनीति विष्णुपुराणात् जगन्निवासः जगतामाधारः कुक्षिस्थाखिल भुवन इति भावः etc.

folio 35ª इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां माघव्याख्यायां सर्वंकषाख्याया प्रथमः सर्गः द्विसप्तसप्तेंदुमिते शाके पुण्याख्यपत्तने ।। छ ।। शाके १७८९ भाद्रपद वद्य ३ तद्दिने समाप्तं ।। ग्रंथसंख्या ९००

folio. 45ª of 2nd canto इति etc. . . . . द्वितीयः सर्गः ।।

Ends.—folio 34ª of 3rd canto

Text तुरगशताकुलस्य परितः परमेकतुरंगजन्मनप्रमथितभूभृतः
प्रतिपथं मथितस्य भृशं महीभृता परिचलतो बलानुजबलस्य पुरः
सततं धृतश्रियाश्चिरविगतश्रियः सलिलनिधेश्च तदा भवदंतरं
महत् ८२

इति श्रीपदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघव्याख्याने तृतीयः सर्गः समाप्तिमगमत् शुभं

भवतु द्विसप्तसप्तेंदु श्रीः शके १७८९ प्रभवनामसंवत्सरे भाद्रपद शु॥ २ तद्दिने समाप्तं ग्रंथसंख्या ९००

References.—(1)—Aufrecht's Catalogus Catalogorum — Part I, page 656ᵃ, part II, page 156ᵇ, 230ᵃ; part III, page 136ᵃ

2 Descriptive Catalogue of Mss., Madras, Vol. XX, Nos. 11770-811.

3 Printed Editions.—Printed in Calcutta, Saṁvat 1925.

शिशुपालवध with टीका सर्वङ्कषा	Śiśupālavadha with Comm. Sarvaṅkaṣā
No. 742	157. / 1866-68.

Size.—$12\frac{2}{8}$ in. by $7\frac{2}{8}$ in.

Extent.— 180 leaves; 20 lines to a page; 42 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; hand-writing, clear and legible; text of all cantos, except 11 and 12, in the middle with commentary above and below it; separate pagination for each canto.

The Ms. is a bound copy and contains 4-20 sargas.

Age.— A modern copy.

Author of the text.— Māgha.

,, ,, com.—Mallinātha.

Begins.— folio 1ᵃ

श्रीगणेशाय नमः

Text निश्वासधूमं सहरत्नभाभिः ॥ भित्वोस्छतं भूमिमिवोरुगाणां ॥
नीलोपलं स्यूतविच्चित्रधातुमसौ गिरिं रैवतकं ददर्श ॥ १ ॥

Com. श्रीगणेशाय नमः ॥ निश्वासेति । निलोपलैरिंद्रनलिमाणिभिः स्यूताः प्रोताः विचित्रानावर्णधातवोगैरिकादयोयस्यूतं ॥ अत एव रत्नभाभिः फणा-

मणिप्रभाभिः महद्भार्मि भित्वानुच्छितं उर्ध्वं निर्गत उरगाणां निश्वासधूमं फूत्कारबाष्पमिव स्थितं रैवतकाख्यं गिरिमसौ हरि ददर्श etc.

folio 12ª इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचिते माघवा(व्या)ख्याने सर्वकषाख्ये चतुर्थः सर्गः॥४॥

Ends.— folio 9ᵇ of 20th Canto

Text शुद्धिं गतैरपि etc. up to वीक्षांबभूवे ॥ ७९ as in No. 730.

Com. अत एव ऋषिगणे. क्षणं स्तूयमानं धाम शिशुपालतेजो विस्मिताक्षैः स्तिमितनेत्रैः नरेंद्रैरोपेन्द्रं कृष्णसंबधिवपुः शरीरं विशत वीक्षांबभूवे दृष्टं। ईक्षते. कर्मणि लिट्। इजादेश्चगुरुमतोनृछ इत्याम। मेघविस्फुजिताच्छंदः॥७९॥

इति श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां माघव्याख्यायां शिशुपालवधो नाम विंशतिमः सर्ग. ॥ श्रीः ॥

References.—See No. 741.

शिशुपालवध
with टीका
सर्वङ्कषा

No. 743

Śiśupālavadha
with comm.
Sarvaṅkaṣā

231.
Viśrāma (i).

Size.—$8\frac{2}{3}$ in. by 4 in.

Extent.—39 leaves; 8 lines to a page; 32 letters to a line.

Description.—Country paper; Devanāgarī characters; hand-writing, clear, legible and uniform; borders ruled in double black lines; 1st and the last folios decorated.

Contains only 9th canto.

Age.— Does not appear to be very old.

Author of the text.—Māgha.

,, ,, comm.—Mallinātha.

Begins.— folio 1ᵇ

॥ श्रीगणाधिपतये नमः ॥ श्रीरस्तु ॥

Text— अभितापसंपदमथोष्णरुचिर्निजतेजसामसहमान इव ॥
पयसि प्रपित्सुरपरांबुनिधेराधिरोढुमस्तगिरिमभ्यपतत् ॥१॥ etc.

Com. अथ सूर्यास्त(स)मयं वर्णयति ॥ अभितापेति अथ मिमंक्षानंतरमुष्णरुचिः सूर्यो निजतेजसामभितापसंपदं संतापातिरेकं असहमान इव अपरांबुराशेः पश्चिमांबुधेः पयसि प्रपित्सुः पतितुमिच्छुः । पतेः सनंताद्दु प्रत्ययः । स निमिमेत्यादिना सादेशः । etc.

Ends.-- folio 38[b]

Text fol. 38[a] —इत्थं नारीर्घटयितुमलं कामिभिः काममासन्
प्राक्षेयांशोः सपदि रुचयः शांतमानांतरायाः ॥
आचार्यत्वरतिषुविकसन्मन्मथश्रीविलासा-
ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासां ॥ ८७ ॥

Com. अत्र प्रथमार्धे प्रस्तुतचंद्रभासां मानशमनकालिनीघटनपाटवविशेषणसाम्यादप्रस्तुताहूतीत्वप्रतीतेः समासोक्तिः द्वितीयार्धेषु शीधुष्वारोपितस्याचार्यत्वस्य प्रकृतोपयोगात्परिणामः तयोः सापेक्ष्यात्संकरः तेन च दूतीनर्मसख्युपमाध्वनिः । उत्तरसर्गे मधुपानरतोत्सववर्णनायाश्चायमेव प्रस्तावः । मंदाक्रांता वृत्तं । मंदाक्रांतजलधिषडगैम्भौंनतौताद्गुरुचेत् ॥ ८७ ॥ इति पदवाक्यप्रमाणपारावारपारीणश्रीमन्महोपाध्यायकोलचलमाल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वंकषाख्ये नवमः सर्गः ॥

References.-- See No. 641.

शिशुपालवध with टीका सर्वंकषा	Śiśupālavadha with comm. Sarvaṅkaṣā
No. 744	233. / Viśrāma (i).

Size.-- 11$\frac{3}{8}$ in. by 5$\frac{1}{5}$ in.

Extent.--62 leaves; 13 lines to a page; 35 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing, clear and legible but not uniform; text in the middle with the commentary above and below it; separate pagination for each canto.

Contains sargas 1 and 2.

Age.—Appears to be old.

Author of the text.—Magha.

,, ,, com.— Mallinātha.

Begins.--folio 1^b

fol. 2^b ॥ श्रीगणेशाय नमः ॥

Text श्रियः पतिः श्रीमतिशासितु etc. as in No. 730

Com. ॥ श्रीगणेशाय नमः ॥

इंदीवरदलश्याममिंदिरानंदकंदलं ॥

वंदारुजनमंदारं वंदेहं यदुनंदनं ॥ १ ॥ etc. as in No. 741.

folio 31^a इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्याय-कोलचलमल्लिनाथसूरिविरचिते माघव्याख्याने सर्वंकषाख्ये प्रथमः सर्ग समाप्तमगमत ॥ छ ॥ श्रीरामचंद्रो जयतु ॥ गणेश सांबशिव प्रीयतां नमः ॥ १ ॥

Ends.— fol. 31^a of 2nd canto

Text.— इति विशकलितार्थामौद्धवीं वाचमेना

मनुगतनयमार्गामर्गलांदुर्नयस्य

नरकरिपुरुदस्थद्रुचकैरुच्छितोरः

स्थलनिपनाभिषणा श्रीश्रुतांनं शुश्रुवांसः

इति श्रीशिशुपालवधाख्ये महाकाव्ये माघकृतौ श्र्यंके मंत्रो नाम द्वितीयः सर्गः समाप्तः ॥ ॥ छ ॥

Com.—उद्धवस्येमामौद्धवीं एनां पूर्वोक्तां वाचं शुश्रुवान् भाषायां सदव-सुश्रुव इति क्वसुप्रत्ययः उच्चैरेव उच्चकैः उन्नतः सन ॥ अव्ययसर्वनाम्नामकच् प्राकटेरिति अकच प्रत्ययः उदस्थादासनादुत्थि ॥ तवान् उदोनूर्ध्वकर्मणीत्यस्य प्रत्युदाहरणां एवं रूपकानुप्रासावलंकारौ मालिनीवृत्तं ॥ ११८ ॥ श्रीरस्तु ॥ इति श्रीकेपदवाक्य etc. ... ... द्वितीयः सर्गः ॥ ॥ श्रीराम जयजयरामः

References.—See No. 741.

शिशुपालवध
with टीका
सर्वङ्कषा

Śisupālavadha
with comm.
Sarvaṅkaṣā

No. 745

548
Viśrāma (1).

Size.—12 in. by 5⅛ in.

Extent.— 40 leaves; 8–9 lines to a page ; 22 letters to a line (text)
38 ,, ,, ,, (com).

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing bold, clear and legible ; text in the middle of the folios and the commentary above and below it.

The Ms. contains only the first canto.

Age.— Not very old.

Author of the text.—Māgha.

,, ,, com.—Mallinātha.

Begins (text).— fol. 2ª

॥ श्रीगणेशाय नमः ॥

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

,,—(com.) fol. 1ᵇ

॥ श्रीगणेशाय नमः ॥

इंदीवरदलश्याम etc. as in No. 741.

Ends.—(text) fol. 39ᵇ

ॐ मित्युक्तवनोऽथशार्ङ्गिण इति व्याहृत्य वाचं नभ-
स्तस्मिन्नुत्पतिते पुरःसुरमुनाविंदोः श्रियं बिभ्रति ॥
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चयं प्रति-
व्योम्नीव भ्रूकुटिच्छलेन वदने केतुश्चकारास्पदं ॥ ७५
॥ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके नारदाभिगमनो नाम प्रथमः सर्गः ॥ १ ॥ ॥ छ ॥ ॥ श्रीराजारामचंद्राय नमः ॥ ॥ श्रीहरिः ॥ १ ॥

References.—See No. 741.

शिशुपालवध
with टीका
सर्वङ्कषा

Śiśupālavadha
with comm.
Sarvaṅkaṣā

No. 476

234.
Viśrāma (i)

Size.— $11\frac{1}{10}$ in by $4\frac{9}{10}$ in.

Extent.— 98 leaves ; 10–12 lines to a page ; 22–24 letters to a line. Text

36 letters to a line. Com.

Description.— Country paper somewhat thick ; Devanāgarī characters, handwriting clear and legible but not uniform ; borders ruled in double red lines ; borders of folios 15–25 in 1st canto and 10–35 in 2nd canto not ruled at all while those of folios 27-38 in 3rd canto ruled in two double red lines and fol. 1–14 in first canto ruled in triple red lines; separate pagination for each canto; text in the middle of the folio, with commentary above and below it ; the colophon of the first canto marked with red pigment.

The Ms. contains sargas 1–3.

Age.— Not very old.

Author of the text.—Māgha.

,, ,, com.—Mallinātha.

Begins.—(text) fol. 2ᵇ

श्रियः पति श्रीमतिशासितुं etc. as in No. 730.

,,—(com.) fol. 1ᵇ

श्रीगणेशाय नमः ॥

इंदीवरदलश्याम etc. as in No. 741

fol. 25ᵃ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्याय-सूरिविरचिते माघकाव्यव्याख्याने सर्वंकषाख्ये प्रथम सर्गः ॥ ॥ श्री लक्ष्मीनारायणार्पणमस्तु ॥ ॥ शुभं भवतु ॥

fol. 35ᵇ इति ... ... द्वितीय सर्गः समाप्तः ॥ छ ॥

Ends.—(text) fol. 38ª

तुरगशताकुलस्य परितः परमेकतुरंगजन्मनः ।
प्रमाथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ॥
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय ।
चिरविगतश्रियः सलिलधेश्च तदा भवदंतरं महत् ॥ ८२ ॥
श्रीशिशुपालवधे महाकाव्ये श्यंके

Ends.—(Com.) fol. 38ᵇ

अत्रोपमेयस्य हरिबलस्य उपमानाजलधेराधिक्यवर्णनात् व्यतिरेकालंकारः पंचकावलीवृत्तं न जभजजाजरौहरय इति कथिता भुवि पंचकावलीलक्षणात् धृतश्रीर्वृत्तमिति केचित् ॥ नजभजुरंस्कृताजजजरारचिता भुवि रुद्रदिक्पतिरिति लक्षणात् ॥ धृतश्रीर्वृत्तमिति छांदसाः धृतश्रीन्र्जौश्ज्जौज्नोत्रिः स्वरा इति लक्षणात् ॥ ८२ ॥ ॥ इति श्रीमहोपा

॥ श्रीरामचंद्राय नमः ॥ इदं पुस्तकं बापट इत्युपनामक वचंभटेन लिखितं ॥ यादृशं पुस्तकं दृष्ट्वा etc. ... ... न विद्यते ॥ ॥ श्रीराम॥

References.—See No. 741.

शिशुपालवध with टीका सर्वङ्कषा	Śiśupālavadha with comm. Sarvaṅkaṣā
No. 747	235. / Viśrāma (i).

Size.—$11\frac{3}{5}$ in. by $5\frac{1}{5}$ in.

Extent.— 287 leaves; 10–12 lines to a page; 28-32 letters to a line.

Description.— Country paper, Devanāgarī characters; hand-writing bold, clear and legible; borders of the first 26 folios ruled in double red lines; text in the middle with commentary above and below it; separate pagination for each canto.

The Ms. contains sargas 11–20.

Age.— Not very old.

Author of the text.--Māgha.

,, ,, com.—Mallinātha.

Begins.—(text) fol. 1[a]

श्रुतिसमधिकमुच्चैः पंचपं पीडयंतः सततमृषभहीनं भिन्नकीकृत्यषड्जं
अभिजगदुरकाकुश्रावकास्निग्धकंठाः परिणतिमिति रात्रेर्मागधा
माधवाय ॥ १ ॥ etc.

(com.) fol. 1[b]

॥ श्रीगणेशाय नमः ॥

। अथ प्रस्तुतं प्रभातवर्णनं प्रारभते ॥ श्रुताति ॥ नास्ते काकुर्यस्येत्य-काकुरविकृतध्वनिः काकुस्त्रियां विकारो यः शाकभात्यादिभिर्ध्वरेरित्यमरः ॥ श्रावयतीति श्रावको etc.

fol. 26[a] इति श्रीपद्वाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोल-चलमल्लिनाथसूरिविराचिते माघव्याख्याने सर्वंकषाख्ये एकादशः सर्ग-प्रभाप्रमफणत् ॥ ।' ११ ॥ ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥

Ends —(text) fol. 23[a]

शुद्धि गतैरपि etc. upto वीक्षांबभूवे ॥ ७९ as in No. 730.
followed by सर्वाधिकारी etc. upto काव्यं व्यधत्त शिशुपालवधा-भिधानं ॥ ८४ ॥ as in No. 730.
followed by ॥ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके दत्तकसूनो-र्माघस्य कृतौ शिशुपालवधो नाम विंशतिमः सर्गः समाप्तमफणत् ॥ श्री ॥ ॥ राम ॥ सदाशिवो जयतु ॥ लेखकपाठकयो शुभं भवतु ॥ ॥ गणेशांबिकयो प्रसादात् ॥ ॥ छ ॥ राम ॥ राम ॥ ॥ छ ॥

,,—(com.) fol. 24[a]

अत एव ऋषिगणैर्महर्षिसंघैः क्षणं स्तूयमानं धाम शिशुपालं तेजो विस्मिताक्षैः स्मिमिते नेत्रैर्नरेंद्रैरौपेंद्रं कृष्णसंबंधिवपुः शरीरं विशत् सत् । वीक्षांबभूवे दृष्टं ॥ इक्षतेः कर्माणि लिट् इजादेश्च गुरुमतो नृप इत्याम् ॥ मेघ विस्फुर्जिता स्यादिति लक्षणात् ॥ ७९ ॥ छ ॥ ॥ रामचंद्रो जयति

॥ इति श्रीमन्महोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां सर्वं-कषासमाख्यायां शिशुपालवधो नाम विंशमितः सर्गः समाप्तिमगच्छत् ॥ २० ॥ ॥ छ ॥

मीमांसान्यायवेदांतभाष्या एपध्यापिता द्विजाः ॥
॥ ॥ येन सोयं मल्लिनाथो व्याख्यान्माघं परार्थतः ॥ १ ॥

सर्वंकषाभिधानं माघभाष्यं समाप्तमिदं ॥
यावद्वृंदारकाली मुकुटमणिमहो दीपितांघ्रित्रिसंध्यं
सूत्रामानागलोके युनतिगणवृतः सर्वसौख्यं भजेत ॥
यावन् मार्तंड एष ग्रहनिकरयुतः संभ्रमेताभ्रमध्ये
तावत्स्वार्थे पदार्थे परिलिखितमिदं पुस्तकं कौसमास्ताम् ॥
॥ श्रीगुरुभ्यो नमः ॥ ॥ छ ॥ ॥ राम ॥ ॥ श्री ॥

on fol. 25^b माघसटिकविंशतिमः सर्गः ॥ २० ॥

on fol. 1^a माघएकादशसर्गः प्रारंभः ॥

References.—See No. 741.

शिशुपालवध
with टीका
सर्वङ्कषा

Śiśupālavadha
with comm.
Sarvaṅkaṣā

No. 748

227.
Viśrāma (i).

Size.—$13\frac{9}{10}$ in. by 7 in.

Extent.—257 leaves; 3-4 lines to a page; (text) 45 letters to a line (text)
10-12 ,, ,, ,, (com.) 50 letters to a line (com.)

Description.—Modern country paper; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in double red lines; text in the middle with the commentary above and below it; folios 36-50, 129-132 missing.

The Ms. Contains Sargas 1-20 with the exception of sargas 3 and 10.

Age.—Not old.

Author of the text—Māgha.

,, ,, com.—Mallinātha.

Begins.—(text) fol. 2ª

श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

,,—(com.) fol 1ᵇ ॥ ओं ॥ श्रीगणेशाय नमः ॥

इंदीवरदलश्याम etc. as in No. 741.

fol. 18ª इति श्रीपदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्याय-माघव्याख्याने कवि श्रीकालीदासकृतौ सर्वंकषाख्ये प्रथमः सर्गः समाप्तिमगमयत् ॥ ॥ श्रीरस्तु ॥ ॥ कल्याणमस्तु ॥

Ends.—(text) fol. 256ª

शुद्धिं गतैरपि etc. upto वीक्षांबभूवे ।·७९ ॥

as in No. 730.

followed by अथ कविवंशवर्णनं ॥

सर्वाधिकारी सुकृताधिकारः etc. upto काव्यं व्यधत्त शिशुपालवधाभिधानं ॥ ८४ ॥ as in No. 730

followed by इति श्रीशिशुपालवधे श्र्यंके महाकाव्ये श्रीदत्तसूनुकवि-श्रीमाघविरचिते दिव्यास्त्रप्रयोगानंतरं शिशुपालवधो नाम विंशतिमः सर्गः ॥ २० ॥ ॥ छ ॥

,,—(com.) fol. 256ª

शुद्धिमिति ॥ तदा तस्मिन्समये ॥ विपक्षोऽरिश्चैद्यः परामुत्कृष्टां शुद्धिं लोहशुद्धिं गतैरुजुभिरप्यविघट्टितमर्मभिः ॥ रस्पष्ट मर्मस्थानैः तं हरिं अजयं जेतुमशक्यं क्षय्यजय्यौ शक्यार्थे निपातः ॥ विदित्वा अथास्मिन्नवसरे मर्माणि अति गच्छंतीति मर्मातिगैः मर्मभेदिभिः अनृजुभिरवक्रैः नितरामशुद्धैरपवित्रैः वाच एव सायका वाक्सायकैरिति रूपकं तुतोद व्यथयामास ॥ चक्रप्रयोगस्यायं उद्धात इति भावः ॥ अत्र वाकसायकानां प्रसिद्धसायकं व्यतिरेकोक्तिर्व्यतिरेकरूपयोः संकरः ॥ वसंततिलकावृत्तं ॥ ७७ ॥ ॥ छ ॥

References:— See No. 741.

शिशुपालवधटीका
called
सर्वङ्कषा

Śiśupālavadhaṭīkā
called
Sarvaṅkaṣā

No. 749

62.
1871-72.

Size.—9$\frac{9}{10}$ in. by 4$\frac{1}{2}$ in.

Extent.— 177 leaves; 19 lines to a page; 50–52 letters to a line.

Description.—Country paper, old in appearance, Devanāgarī characters, hand-writing small and uniform but not legible; borders ruled in two double black lines; edges also ruled, red pigment used; fol. 1ᵃ and 177ᵇ are decorated; edges of fol. 43, 44, 45 torn; complete.

Age.—Samvat 1812.

Author.— Mallinātha.

Ends.—fol. 1ᵇ

॥ ए० ॥ ॐ नम॰ ॥ श्रीगुरवे नमः ॥

इंदीवरदलश्याम etc. as in No. 741.

Ends.—fol. 176ᵇ

शुद्धिमिति तदा तस्मिन् समये etc. upto वसंततिलकवृत्तेराद्देति ७७ as in No. 748.

followed by इति श्रीपदवाक्यप्रमाणसर्वंकषाव्याख्याने विंशतितमः सर्गः समाप्तः २० संवत् १८१२ वर्षे प्रथम ज्येष्ट वलक्षपक्षे एकादशमीतिथौ लिखितं श्रीपंश्रीरत्नहंसस्ताच्छिष्य श्रीपंश्रीराजहंसस्तच्छिष्यश्रीपंश्रीतत्वहंसजीकस्य इदं पुस्तकं ॥ शुभं भवतु । मंगलं भवतु ॥ श्रीः । श्रीः । छ छ :

References.—See No. 741.

शिशुपालवधटीका	Śiśupālavadhaṭīkā
called	called
सर्वंकषा	Sarvaṅkaṣā
No. 750	803. / 1886-92.

Size.—9⅝ in. by 4¼ in.

Extent.— 415 leaves; 11 lines to a page; 28–30 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting clear, legible and uniform; borders ruled in two double black lines; red pigment used to indicate verse numbers and colophons; the Ms. begins abruptly on fol.

56, with the commentary on verse No. 103 of the 2nd sarga. Folios missing:- 1–55, 89, 249, 256 ; foll. 149 and 456 repeated. Contains cantos 2 (inc.) to 20.

- Not very old.

– Mallinātha.

-abruptly fol. 56[a]

संधाय अध्वरस्यधं अध्वरधुरं । रुक्यरीत्यादिना समासांतोऽप्रत्ययः । समासांतानां प्रकृतिलिंगत्वा तत्पुरुषे परत…गत्वि…पूर्वविवक्तते वाहुस्थाति ॥
etc.

fol. 60[b] इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचल-मल्लिनाथसूरिविरचिते माघव्याख्याने सर्वंकषाख्ये द्वितीयः स्वर्गः ॥२॥
॥ छ ॥

--fol. 471[a]

शुद्धिमिति ॥ तदा तस्मिन्समये etc. upto वसंततिलकावृत्तं ॥७७॥
as in No. 748.

followed by इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोल-चलमाल्लिनाथसूरिविरचिते माघव्याख्याने सर्वंकषाख्ये विंशतिसर्गः ॥ संपूर्णः ॥ २० ॥ इति श्रीमाघकाव्यस्य टीका सर्वंकषाख्या संपूर्णाः ॥ ग्रंथाग्रश्लोकसंख्या १२१२७ शुभं भवतु कल्याणमस्तु ॥ लेखकपाठकयोः श्रीरस्तु ॥

यादृशं पुस्तके दृष्टं ॥ तादृशं लखितं मया ॥
यद शुद्धमशुद्धं वा । मम दोषो न दीयतां ॥ १ ॥ श्री ॥
चित्कोशेभ्यस्त श्रीयशोविजयवाचकैरयं ग्रंथः
श्रीनयविजयबुधानां चिराय सुकृतानुमतिहेतोः ॥ १ ॥

— See No. 741.

शिशुपालवध
with
संदेहविषौषधी

Śiśupālavadha
with
Saṁdehaviṣauṣadhī

No. 751

587.
1891-95.

Size.—11⅘ in. by 4½ in.

Extent.— 249 leaves; 12 lines to a page; 44 letters to a line.

Description.— Country paper; old in apppearance; Devanāgarī characters; handwriting, clear and legible; some folios torn and pasted with slips; folios 1-102, 119, 157, 172, 236-239, 269 and 325 missing; fol. No. 278 repeated; incomplete.

Contains Sargas 6-20.

Age.— Appeais to be old.

Author of the text—Māgha.

,, ,, com.—Vallabhadeva.

Begins abruptly folio 103[a]

Text ॐविलुलितालकसंहतिरामृषमृंगदृशां श्रमवारिललाटजम् ।
तनुतरंगततीस्सरसां दलत्कुवलयं वलयन्मरुदा ववौ etc.

Com. ... ...ति विशेषणद्वारेण लिंगान्याह नवपलाशानि सरसकिसलयानि पलाशवनानि वृक्षविशेषकाननानि यत्र तथा मृदुलाः कोमला...etc.

folio 121[a] इति श्रीमाघकाव्यविवृत्तौ षष्ठस्सर्गः

Ends.—folio 360[a]

Text श्रिया जुष्टं etc. as in No. 730.

Com. उपेंद्रस्येदमौपेंद्रम् वीक्ष्यांबभूवे इति ईक्षेः कर्मणि लकारः ईजादश्चेश्च गुरुमतोनृच्छा इति आम्प्रत्ययः आमयं इति लेलुक कृजानुप्रयुज्यते लिट् भावकर्मणोरिति तद्व्यम्पमादेशः भुवो लघुगल टलिटोः द्वित्वं भूह्रस्वः षाशनमत्तेति सिद्धेशः कर्त्रर्थं इहः नमः... कभुवाकस्य भवस्तलोदेशेन ये दत्तेनेति जयादिम्पस्वेनर्मूलोदाहरणमेव दत्तवांस्तिनेदेशार्थत्वादेवेत्याभिप्रायेणेति तन्मते नात्रात्वमवन्येव वातामध्यमश्लेषो सकरोमाशलंकारः सुवृत्ता राम-

वृत्तम् सुवृत्ते यौवनेस्तदनुलाघवः पंचषाय वेगं यौ श्रीशब्दलक्ष्मत्वात्काव्यस्य प्रतिसर्गसमाप्तिश्रीशब्दप्रयोगः इति भद्रम् ... ... इत्यानन्ददेवायनि वल्लभदेवविरचितायां शिशुपालवधटीकायां सन्देहविषौषधीख्यायां विंशः सर्गः अधुना लाघवेन कविः निजवंशवर्णनं चिकीर्षुराह

सर्गाधिकारी सुकृताधिकारः etc. up to परस्तनूजः as in No. 730. Each verse has its Commentary.

References.—Mss—Auf. i, 656 ; ii, 230 ; iii, 136.

Editions.—Edition by E. Hultzsch with the commentaries of Vallabhadeva and Mallinātha—Asia Major, Leipzig, 1926.

शिशुपालवध	Śiśupālavadha
with	with
संदेहविषौषधी	Saṁdehaviṣauṣadhī
No. 752	804. / 1886–92.

Size.— 10¼ in. by 4⅗ in.

Extent.—53 leaves ; 20 lines to a page ; 56 letters to a line.

Description.— Modern paper ; old in appearance ; Devanāgarī characters with पृष्ठमात्राs ; hand-writing small but clear and legible; borders ruled in triple red lines ; square blank spaces in the centre; fol. No. 41 repeated.

The Ms. breaks off at the 50th verse of the 7th canto.

Age.—Appears to be old.

Author of the text.—Māgha.

" " com.—Vallabhadeva.

Begins.— fol. 1ᵃ

॥ ६० ॥ ॐ नमः श्रीसर्वज्ञाय ॥

Text श्रियः पतिः श्रीमतिशासितुं etc. as in No. 730.

Com. यस्य भृंगावलि· कंठे श्रुतदानं बुभूषिते ।
भाति रुद्राक्षमालेव । स वः पायाद्गणाधिपः ॥ १ ॥
अभीष्टफलसंपत्तिहेतुं स्मृत्वा सरस्वतीं ।
शिशुपालवधे काव्ये सारटीका विधीयते ॥ २
कृता महद्भिर्यत एव टीका । ममापि यत्नस्तत एव युक्तः ।
ब्रम्हाच्युतार्चितपादपद्मो । न पूज्यते किं मनुजै गिरीश· ३
सत्यं रम्याणि वस्तूनि दूषयंत्यतिमत्सराः ।
किं तु किंचित् प्रमाणज्ञा दृश्यते पंचषानराः ॥ ४ ॥

अभिलषितसिद्ध्यर्थं मंगलादिकाव्यं कर्त्तव्यमिति स्मरात्कविः श्रीशब्द-मादौ प्रायुंक्तः ॥ etc.

folio 8b इति वल्लभविरचिते प्रथमः सर्गः ॥ छ ॥

folio 19a इति शिशुपालवधे महाकाव्ये माघस्य कृतौ श्यंके वल्लभ-विरचितायां टीकायां मंत्रवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ छ ॥

folio 47a इति माघकृतो शिशुपालवधे वसंतादिऋतुवर्णनं नाम षष्ठः सर्गः ॥ छ ॥

Ends.—folio. 52a

Text विजिनमिति बलादमुं गृहीत्वा क्षणमथ वीक्ष्य विपक्षमंतिकोऽन्या ।
अभिपतितुमना लघुत्वभीतेरभवदमुंचति वल्लभेति गुर्व्वी ॥

Com. काचित् नारी पत्यौ वल्लभे अमुंचति सति अतिगुर्व्वी अभवत्...

References.—See No. 751.

शिशुपालवध	Śiśupālavadha
witth	with
संदेहविषौषधी	Saṁdehaviṣauṣadhī
No. 753	435. / 1887-91.

Size.—10⅝ in. by 5¼ in.

Extent.—593 (590 + 3) leaves ; 10 lines to a page ; 30 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing, bold, clear and legible; folios 1-31, 33-38, 154, 270, 342-44 and 395 missing, fol. no. 80 repeated twice.

